श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

# महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे षष्ठोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे षष्ठोऽध्यायः ॥

राजोवाच

न नूनं भगव आत्मारामाणां योगसमीरितज्ञानाव -
भर्जितकर्मबीजानां ऐश्वर्याणि पुनः क्लेशदानि
भवितुमर्हन्ति यदृच्छयोपगतानि ॥ 1 ॥

ऋषिरुवाच

सत्यमुक्तं किन्त्विह वा एके न मनसोऽद्धा विश्रम्भ -
मनवस्थानस्य शठकिरात इव सङ्गच्छन्ते ॥ 2 ॥

तथा चोक्तं -

न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते।
यद्विश्रम्भाच्चिराच्चीर्णं चस्कन्द तप ऐश्वरम् ॥ 3 ॥

नित्यं ददाति कामस्यच्छिद्रं तमनु येऽरयः।
योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥ 4 ॥

कामो मन्युर्मदो लोभः शोकमोहभयादयः।
कर्मबन्धश्च यन्मूलः स्वीकुर्यात्को नु तद् बुधः ॥ 5 ॥

अथैवमखिललोकपालललामोऽपि
विलक्षणैर्जडवदवधूतवेषभाषाचरितै -

रविलक्षितभगवत्प्रभावो योगिनां
साम्परायविधिमनुशिक्षयन् स्वकलेवरं
जिहासुरात्मन्यात्मानमसंव्यवहित -
मनर्थान्तरभावेनान्वीक्षमाण
उपरतानुवृत्तिरुपरराम ॥ **6** ॥

तस्य ह वा एवं मुक्तलिङ्गस्य भगवत
ऋषभस्य योगमायावासनया देह इमां
जगतीमभिमानाभासेन सङ्क्रममाणः
कोङ्कवेङ्ककुटकान् दक्षिणकर्णाटकान्
देशान् यदृच्छयोपगतः कुटकाचलोपवन
आस्यकृताश्मकवल उन्माद इव
मुक्तमूर्धजोऽसंवीत एव विचचार ॥ **7** ॥

अथ समीरवेगविधूतवेणुविकर्षणजातोग्र -
दावानलस्तद्वनमालेलिहानः सह तेन ददाह ॥ **8** ॥

यस्य किलानुचरितमुपाकर्ण्य कोङ्कवेङ्ककुटकानां
राजार्हन्नामोपशिक्ष्य कलावधर्म उत्कृष्यमाणे
भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय
कुपथपाखण्डमसमञ्जसं निजमनीषया मन्दः
सम्प्रवर्तयिष्यते ॥ **9** ॥

येन ह वाव कलौ मनुजापसदा देवमायामोहिताः
स्वविधिनियोगशौचचारित्रविहीना देवहेलना -
न्यपव्रतानि निजनिजेच्छया गृह्णाना अस्नाना -
नाचमनाशौचकेशोल्लुञ्चनादीनि कलिनाधर्मबहुलेनो -

पहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः
प्रायेण भविष्यन्ति ॥ **10** ॥

ते च ह्यर्वाक्तनया निजलोकयात्रयान्धपरम्परया -
ऽऽश्वस्तास्तमस्यन्धे स्वयमेव प्रपतिष्यन्ति ॥ **11** ॥

अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः ॥ **12** ॥

तस्यानुगुणान् श्लोकान् गायन्ति -
अहो भुवः सप्तसमुद्रवत्या
द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारेः
कर्माणि भद्राण्यवतारवन्ति ॥ **13** ॥

अहो नु वंशो यशसावदातः
प्रैयव्रतो यत्र पुमान् पुराणः ।
कृतावतारः पुरुषः स आद्य -
श्चचार धर्मं यदकर्महेतुम् ॥ **14** ॥

को न्वस्य काष्ठामपरोऽनुगच्छे -
न्मनोरथेनाप्यभवस्य योगी ।
यो योगमायाः स्पृहयत्युदस्ता
ह्यसत्तया येन कृतप्रयत्नाः ॥ **15** ॥

इति ह स्म सकलवेदलोकदेवब्राह्मणगवां
परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितमीरितं
पुंसां समस्तदुश्चरिताभिहरणं परममहा -
मङ्गलायनमिदमनुश्रद्धयोपचितयानुशृणोत्या -

श्रावयति वावहितो भगवति तस्मिन् वासुदेव
एकान्ततो भक्तिरनयोरपि समनुवर्तते ॥ **16** ॥

यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसार -
परितापोपतप्यमानमनुसवनं स्नापयन्तस्तयैव परया
निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि
स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव
परिसमाप्तसर्वार्थाः ॥ **17** ॥

राजन् पतिर्गुरुरलं भवतां यदूनां
    दैवं प्रियः कुलपतिः क्व च किङ्करो वः।
अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो
    मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥ **18** ॥

नित्यानुभूतनिजलाभनिवृत्ततृष्णः
    श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः।
लोकस्य यः करुणयाभयमात्मलोक -
    माख्यान्नमो भगवते ऋषभाय तस्मै ॥ **19** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे ऋषभदेवानुचरिते षष्ठोऽध्यायः ॥